AEP STUDY CIRCLE

IIT-NEET-CBSE

ACCENTS EDUCATIONAL PROMOTERS

23 YEARS OF LEGACY

# SANSKRIT

CBSE-X

MOCK - TEST

Prepare for your CBSE Class 10 Sanskrit examination with our specially designed Sanskrit Mock Test. This resource is crafted to assess your understanding of Sanskrit grammar, literature, and language skills, providing you with valuable practice and insights.




NEET IIT-JEE CBSE

OFFLINE-ONLINE LEARNING ACADEMY

*The Success Destination*

Prepare for success in CBSE Class 10 Sanskrit with our Mock Test. Order now to elevate your proficiency and approach your exams with confidence and assurance!




+91-9939586130
+91-7739650505

2ND FLOOR, SATKOUDI COMPLEX, THANA CHOWK, RAMGARH - 829122-JH

# SANSKRIT
CBSE-X

**समयः – होराद्वयम्** **सम्पूर्णाङ्काः – 40**

**सामान्यनिर्देशाः –**
1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 प्रश्नाः सन्ति।
2. अस्य प्रश्नपत्रस्य पठनाय 20 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
4. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् एव लेखनीया।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
6. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## वर्णनात्मकाः प्रश्नाः ( अङ्काः 40 )

### अपठितावबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** ( 10 )

सूर्यवंशे सर्वप्रथमं मनुर्नाम नृपः अभवत्। तस्य कुले एव दिलीपः इति ख्यातनामा राजा समुत्पन्नः। राजा दिलीपः सर्वेषां विषयाणां ज्ञाता आसीत् तथापि सः सर्वदा अभिमानरहितः, पराक्रमी, परिश्रमी, क्षमाशीलः आसीत्। दिलीपः न्यायपूर्वकं पितृवत् च प्रजापालनं करोति स्म। सः प्रजायाः रक्षणे सर्वदा उद्यतः भवति स्म। अतः सः एव प्रजायाः पिता आसीत्। राजा दिलीपः यदा चिरं सन्ततिं न अलभत तदा तं गुरुवशिष्ठः सन्ततिं प्राप्तुं कामधेनोः पुत्र्याः नन्दिन्याः सेवार्थम् आदिशत्। दिलीपः स्वभार्यया सह एकविंशतिः दिवसपर्यन्तं गोसेवाम् अकरोत्। द्वाविंशतितमे दिने एकः सिंहः नन्दिनीम् आक्राम्यत्। दिलीपः गोरक्षायै स्वशरीरं समर्पयितुम् उद्यतः अभवत्। प्रसन्ना नन्दिनी तस्मै सन्ततेः वरम् अयच्छत्।

**(अ) एकपदेन उत्तरत– ( केवलं प्रश्नद्वयम् )** ( 1 × 2 = 2 )

(*i*) दिलीपः कया सह गोसेवाम् अकरोत्?

(*ii*) दिलीपः किमर्थं स्वशरीरं समर्पयितुम् उद्यतः अभवत्?

(*iii*) सूर्यवंशे सर्वप्रथमं कः नृपः अभवत्?

**उत्तराणि–** (*i*) भार्यया (*ii*) गोरक्षायै (*iii*) मनुः/मनुर्नाम

**(आ) पूर्णवाक्येन उत्तरत– ( केवलं प्रश्नद्वयम् )** ( 2 × 2 = 4 )

(*i*) गुरुवशिष्ठः किमर्थं नन्दिन्याः सेवार्थम् आदिशत्?

(*ii*) दिलीपः कथं प्रजापालनं करोति स्म?

(*iii*) दिलीपः कति दिवसपर्यन्तं गोसेवाम् अकरोत्?

**उत्तराणि–** (*i*) गुरुः वशिष्ठः सन्ततिं प्राप्तुं राजानं दिलीपं नन्दिन्याः सेवार्थम् आदिशत्।

(*ii*) दिलीपः न्यायेन धर्मेण च पितृवत् प्रजापालनं करोति स्म।

(*iii*) दिलीपः एकविंशति-दिवसपर्यन्तं गोसेवाम् अकरोत्।

HELPLINE : +91-9939586130 // +91-7739650505
2ND FLOOR, SATKOUDI COMPLEX, THANA CHOWK, RAMGARH - 829122-JH

a

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** (1)

**उत्तरम्–** दिलीपः / राजादिलीपः अथवा अन्यः कोऽपि समुचितः शीर्षकः।

**(ई) यथानिर्देशम् उत्तरत– (केवलं प्रश्नत्रयम्)** (1 × 3 = 3)

(*i*) 'आक्राम्यत्' इत्यस्याः क्रियायाः कर्तृपदं किम्?

(*ii*) 'क्षमाशीलः' इति पदस्य विशेष्यं गद्यांशात् चित्वा लिखत।

(*iii*) 'वंशे' इत्यस्य पदस्य कः पर्यायः अत्र आगतः?

(*iv*) अनुच्छेदे 'अलसः' पदस्य कः विपर्ययः आगतः?

**उत्तराणि–** (*i*) सिंहः (*ii*) दिलीपः (*iii*) कुले (*iv*) परिश्रमी

## रचनात्मकं कार्यम्

**2. भवान् अभिनवः। भवान् पितुः स्थानान्तरणवशात् असमप्रदेशम् आगतः। स्थानान्तरण-प्रमाणपत्रं प्राप्तुं प्रधानाचार्यां प्रति लिखिते प्रार्थनापत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखतु।**

(½ × 10 = 5)

सेवायाम्

माननीया (*i*) ........................

डी.ए.वी. विद्यालयः,

नवदेहली।

**विषयः–** स्थानान्तरण-प्रमाणपत्रं प्राप्तुं प्रार्थनापत्रम्।

महोदय!

(*ii*) ...................... निवेदनम् अस्ति यद् अहं भवत्याः विद्यालये नवमकक्षायां (*iii*) ......................। मम पितुः (*iv*) ...................... असमप्रदेशस्य गौहाटीनगरे सञ्जातम्। मम सम्पूर्णः परिवारः तत्रैव गत्वा निवासं (*v*) ..............................। अहम् अपि (*vi*) .............................. सह गत्वा तत्रैव (*vii*) ...................... । अतः अहं प्रार्थये यत् कृपया मह्यं स्थानान्तरणपत्रं (*viii*) ...................... अनुगृह्णातु। भवत्याः (*ix*) ...................... कृपा भविष्यति। धन्यवादः।

भवत्याः (*x*) ...................... शिष्यः

अभिनवः

नवमकक्षास्थः

अनुक्रमाङ्कः–3

दिनाङ्कः ..............................

**मञ्जूषा–** सविनयम्, पठामि, प्रधानाचार्या, परिवारेण, करिष्यति, प्रदाय, स्थानान्तरणम् पठिष्यामि, महती, आज्ञाकारी

**उत्तराणि–** (*i*) प्रधानाचार्या (*ii*) सविनयम् (*iii*) पठामि (*iv*) स्थानान्तरणम्
(*v*) करिष्यति (*vi*) परिवारेण (*vii*) पठिष्यामि (*viii*) प्रदाय
(*ix*) महती (*x*) आज्ञाकारी

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** (1 × 5 = 5)



HELPLINE : +91-9939586130 // +91-7739650505
2ND FLOOR, SATKOUDI COMPLEX, THANA CHOWK, RAMGARH - 829122-JH



| | |
|---|---|
| **मञ्जूषा–** | अग्रजस्य, अनुजस्य, भगिनी, रक्षाबन्धनम्, रक्षासूत्रम्, मणिबन्धे, मिष्टान्नम्, प्रसन्नौ, पर्वण: बध्नाति। |

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभि: संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत–** **(1 × 5 = 5)**

**''दीपावलि:''**

| | |
|---|---|
| **मञ्जूषा–** | दीपानां पङ्क्ति:, जना:, रात्रौ, पूजयन्ति, प्रतीकम्, मिष्टान्नम्, वितरन्ति, स्फोटयन्ति, दीपमालिकोत्सव:, उल्लाससमयम्, अमावस्यायाम्, उत्साहेन, बालका: अपि। |

**उत्तराणि–**

(*i*) अस्मिन् चित्रे रक्षाबन्धनस्य त्योहारं दृश्यते।
(*ii*) भगिनी अग्रजस्य हस्ते रक्षासूत्रं बध्नाति।
(*iii*) भगिनी अतीव प्रसन्ना अस्ति।
(*iv*) रक्षासूत्रं मणिबन्धे सुशोभते।
(*v*) परिवारे सर्वे जना: मुदिता: सन्ति।

**अथवा**

(*i*) इदम् चित्रं दीपमालिकोत्सवस्य अस्ति।
(*ii*) अस्मिन् उत्सवे जना: दीपानां प्रज्ज्वलनं कुर्वन्ति।
(*iii*) उत्साहेन बालका: मिष्टान्नं खादन्ति।
(*iv*) रात्रौ जना: लक्ष्मीगणेश–पूजनं कुर्वन्ति।
(*v*) सर्वत्र उल्लासमयं वातावरणं विद्यते।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– ( केवलं वाक्यपञ्चकम् )** **( 1 × 5 = 5 )**

(*i*) उद्यान में फूल खिल रहे हैं। (Flowers are blooming in the garden.)
(*ii*) मेरे पास पाँच फल हैं। (I have five fruits.)
(*iii*) दिल्ली भारत की राजधानी है। (Delhi is the capital of India.)
(*iv*) कल हम दोनों गोवा गए थे। (Both of us went to Goa yesterday.)
(*v*) कृपया तुम मेरे लिए पानी लाओ। (Please bring water for me.)
(*vi*) शनिवार को मैं उत्सव में जाऊँगा। (I will go to festival on Satuday.)
(*vii*) अब तुम्हें पढ़ना चाहिए। (You should study now.)

**उत्तराणि–**

(*i*) उद्याने पुष्पाणि विकसन्ति।
(*ii*) मम समीपे पञ्च फलानि सन्ति।
(*iii*) दिल्ली/देहली भारतस्य राजधानी अस्ति।
(*iv*) ह्य: आवां गोवानगरम् अगच्छाव/गतवन्तौ।
(*v*) कृपया त्वं मह्यं/मदर्थं जलम् आनय।
(*vi*) शनिवासरे अहम् उत्सवं गमिष्यामि।
(*vii*) अधुना त्वं पठे: **अथवा** अधुना त्वया पठनीयम्/पठितव्यम्।

## पठितावबोधनम्

**5. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **( 3 )**

विचित्रा दैवगति:। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन् चौर: गृहाभ्यन्तरं प्रविष्ट:। तत्र निहितामेकां मञ्जूषाम् आदाय पलायित:। चौरस्य पादध्वनिना प्रबुद्धोऽतिथि: चौरशङ्कया तमन्वधावत् अगृहणाच्च, परं विचित्रमघटत। चौर: एव उच्चै: क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति। तस्य तारस्वरेण प्रबुद्धा: ग्रामवासिन: स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरुष: तम् अतिथिम् चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

HELPLINE : +91-9939586130 // +91-7739650505
2ND FLOOR, SATKOUDI COMPLEX, THANA CHOWK, RAMGARH - 829122-JH

**(अ) एकपदेन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( ½ × 2 = 1 )**

(*i*) दैवगतिः कीदृशी:?

(*ii*) गृहाभ्यन्तरं कः प्रविष्टः?

(*iii*) अतिथिः केन प्रबुद्धः?

**उत्तराणि–** (*i*) विचित्रा (*ii*) चौरः (*iii*) पादध्वनिना

**(आ) पूर्णवाक्येन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( 1 × 2 = 2 )**

(*i*) ग्रामवासिनः किम् अकुर्वन्?

(*ii*) रक्षापुरुषः किम् अकरोत्?

(*iii*) चौरः किम् आदाय पलायितः?

**उत्तराणि–** (*i*) ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वा अभ्यर्त्सयन्।

(*ii*) रक्षापुरुषः अतिथिम् चौरोऽयम् इति प्रख्याप्य कारागृहे अक्षिपत्।

(*iii*) गृहे स्थितामेकाम् मञ्जूषाम् आदाय पलायितः।

**6. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **( 3 )**

निमित्तमुद्दिश्य हि यः प्रकुप्यति,
ध्रुवं स तस्यापगमे प्रसीदति।
अकारणद्वेषि मनस्तु यस्य वै,
कथं जनस्तं परितोषयिष्यति।।

**(अ) एकपदेन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( ½ × 2 = 1 )**

(*i*) अत्र किम् अकारणं द्वेषि उक्तम्?

(*ii*) किम् उद्दिश्य यः प्रकुप्यति?

(*iii*) कस्य अपगमे मनुष्यः प्रसीदति?

**उत्तराणि–** (*i*) मनः (*ii*) निमित्तम् (*iii*) निमित्तस्य/तस्य

**(आ) पूर्णवाक्येन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( 1 × 2 = 2 )**

(*i*) मनुष्यः कदा ध्रुवं प्रसीदति?

(*ii*) कः जनः कथमपि न परितोषयिष्यति?

(*iii*) निमित्तापगमे जनः किं करोति?

**उत्तराणि–** (*i*) मनुष्यः निमित्तस्य अपगमे ध्रुवं प्रसीदति।

(*ii*) कारणद्वेषि मनस्तु कथमपि जनः न परितोषयिष्यति।

(*iii*) निमित्तापगमे जनः प्रसीदति।

**7. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **( 3 )**

**मयूरः–** (वृक्षोपरितः–साट्टहासपूर्वकम्) विरम्, विरम्, आत्मश्लाघायाः। किं न जानासि यत्–

यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा।
अकर्णधारा जलधौ विप्लवेतेह नौरिव।।

को न जानाति तव ध्यानावस्थाम्। 'स्थितप्रज्ञ' इति व्याजेन वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम्। तव

HELPLINE : +91-9939586130 // +91-7739650505
2ND FLOOR, SATKOUDI COMPLEX, THANA CHOWK, RAMGARH - 829122.JH

कारणात् तु सर्वं पक्षिकुलमेवावमानितं जातम्।

**वानरः–** (सगर्वम्) अतएव कथयामि यत् अहमेव योग्यः वनराजपदाय। शीघ्रमेव मम राज्याभिषेकाय तत्पराः भवन्तु सर्वे वन्यजीवाः।

**मयूरः–** अरे वानर! तूष्णीं भव। कथं त्वं योग्यः वनराजपदाय? पश्यतु पश्यतु मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एवाहं पक्षिराजः कृतः अतः वने निवसन्तं मां वनराजरूपेणापि द्रष्टुं सज्जाः भवन्तु अधुना। यतः कोऽप्यन्यः विधातुः निर्णयम् अन्यथा कर्तुं क्षमः?

**काकः–** (सव्यङ्ग्यम्) अरे अहिभुक्! नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम्।

**(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)** **(½ × 2 = 1)**

(*i*) कः सगर्वं वदति?

(*ii*) नाट्यांशे कः श्लोकं वदति?

(*iii*) 'अरे वानर! तूष्णीं भव।' इति कः कथयति?

**उत्तराणि–** (*i*) वानरः (*ii*) मयूरः (*iii*) मयूरः

**(आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्)** **(1× 2 = 2)**

(*i*) विधात्रा मयूरः कथं पक्षिराजः कृतः?

(*ii*) काकः किं वदति?

(*iii*) वानरः (सगर्वं) किं वदति?

**उत्तराणि–** (*i*) शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव मयूरः पक्षिराजः कृतः।

(*ii*) काकः (सव्यङ्ग्यम्)– "अरे अहिभुक्! नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम्।" इति वदति।

(*iii*) वानरः (सगर्वं) "अहमेव योग्यः वनराजपदाय। शीघ्रमेव मम राज्याभिषेकाय तत्पराः भवन्तु सर्वे वन्यजीवाः" इति कथयति।

**8. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत–** **(½× 4 = 2)**

**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**
**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥**

**अन्वयः–** यः (*i*) ........................ वाचम् त्यक्त्वा परुषाम् वाचम् (*ii*) ........................ (सः) विमूढधीः पक्वम् (फलम्) (*iii*) ........................ अपक्वम् फलम् (*iv*) ........................ ।

**मञ्जूषा–** अभ्युदीरयेत्, भुङ्क्ते, धर्मप्रदाम्, परित्यज्य

**उत्तराणि–** (*i*) धर्मप्रदाम् (*ii*) अभ्युदीरयेत् (*iii*) परित्यज्य (*iv*) भुङ्क्ते

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत–** **(½× 4 = 2)**

**काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।**
**वसन्तसमये प्राप्ते काकः काकः पिकः पिकः॥**

**भावार्थः–** अस्य भावोऽस्ति यत् (*i*) ........................ वर्णः कृष्णः वर्तते पिकस्य अपि वर्णः (*ii*) ........................ एव अस्ति। अतः पिके काके च कः भेदः अस्ति अर्थात् वर्णदृष्ट्या तयोः कश्चिद् भेदो न दृश्यते। परन्तु यदा (*iii*) ........................ समयः आगच्छति तदा तयोः स्वरैः ज्ञायते यत् कः (*iv*) ........................ अस्ति कश्च पिको वर्तते।

**मञ्जूषा–** वसन्तस्य, काकस्य, काकः, कृष्णः

**उत्तराणि–** (*i*) काकस्य (*ii*) कृष्णः (*iii*) वसन्तस्य (*iv*) काकः


HELPLINE : +91-9939586130 // +91-7739650505
2ND FLOOR, SATKOUDI COMPLEX, THANA CHOWK, RAMGARH - 829122-JH

9. **अधोलिखितं कथांशं समुचितक्रमेण लिखत–** ( 1/2 × 8 = 4 )

(*i*) तत्र निहितामेकां मञ्जूषाम् आदाय पलायित:।

(*ii*) चौर: एव उच्चै: क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति।

(*iii*) चौरस्य पादध्वनिना प्रबुद्धोऽतिथि: चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत।

(*iv*) तस्यामेव रात्रौ कश्चन चौर: गृहाभ्यन्तरं प्रविष्ट:।

(*v*) विचित्रा दैवगति:।

(*vi*) तस्य तारस्वरेण प्रबुद्ध: ग्रामवासिन: स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्।

(*vii*) यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्।

(*viii*) तत्क्षणमेव रक्षापुरुष: तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

**उत्तराणि–**

(*i*) विचित्रा दैवगति:।

(*ii*) तस्यामेव रात्रौ कश्चन चौर: गृहाभ्यन्तरं प्रविष्ट:।

(*iii*) तत्र निहितामेकां मञ्जूषाम् आदाय पलायित:।

(*iv*) चौरस्य पादध्वनिना प्रबुद्धोऽतिथि: चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत।

(*v*) चौर: एव उच्चै: क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति।

(*vi*) तस्य तारस्वरेण प्रबुद्ध: ग्रामवासिन: स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्।

(*vii*) यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्।

(*viii*) तत्क्षणमेव रक्षापुरुष: तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

HELPLINE : +91-9939586130 // +91-7739650505
2ND FLOOR, SATKOUDI COMPLEX, THANA CHOWK, RAMGARH - 829122-JH